# Ganapati Gakara Ashtottarashatanamavali

# श्रीगणपतिगकाराष्टोत्तरशतनामावली

## Document Information

Text title : gaNapatigakArAShTottarashatanAmAvalI 108 Ganesha names starting with ga

File name : gaNapatigakArAShTottarashatanAmAvalI.itx

Category : ganesha, aShTottarashatanAmAvalI, nAmAvalI

Location : doc_ganesha

Proofread by : NA

Latest update : November 18, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose. Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

**Please help to maintain respect for volunteer spirit.**

August 31, 2019

*sanskritdocuments.org*

# श्रीगणपतिगकाराष्टोत्तरशतनामावली

ॐ गकाररूपाय नमः ।
ॐ गम्बीजाय नमः ।
ॐ गणेशाय नमः ।
ॐ गणवन्दिताय नमः ।
ॐ गणाय नमः ।
ॐ गण्याय नमः ।
ॐ गणनातीतसद्गुणाय नमः ।
ॐ गगनादिकसृजे नमः ।
ॐ गङ्गासुताय नमः ।
ॐ गङ्गासुतार्चिताय नमः । १०
ॐ गङ्गाधरप्रीतिकराय नमः ।
ॐ गवीशेड्याय नमः ।
ॐ गदापहाय नमः ।
ॐ गदाधरनुताय नमः ।
ॐ गद्यपद्यात्मककवित्वदाय नमः ।
ॐ गजास्याय नमः ।
ॐ गजलक्ष्मीपते नमः ।
ॐ गजावाजिरथप्रदाय नमः ।
ॐ गञ्जानिरतशिक्षाकृतये नमः ।
ॐ गणितज्ञाय नमः । २० (ॐ गणोत्तमाय नमः ।)
ॐ गण्डदानाञ्चिताय नमः ।
ॐ गन्त्रे नमः ।
ॐ गण्डोपलसमाकृतये नमः ।
ॐ गगनव्यापकाय नमः ।
ॐ गम्याय नमः ।

ॐ गमनादिविवर्जिताय नमः ।
ॐ गण्डदोषहराय नमः ।
ॐ गण्डभ्रमद्भ्रमरकुण्डलाय नमः ।
ॐ गतागतज्ञाय नमः ।
ॐ गतिदाय नमः । ३०
ॐ गतमृत्यवे नमः ।
ॐ गतोद्भवाय नमः ।
ॐ गन्धप्रियाय नमः ।
ॐ गन्धवाहाय नमः ।
ॐ गन्धसिन्धुरवृन्दगाय नमः ।
ॐ गन्धादिपूजिताय नमः ।
ॐ गव्यभोक्त्रे नमः ।
ॐ गर्गादिसन्नुताय नमः ।
ॐ गरिष्ठाय नमः ।
ॐ गरभिदे नमः । ४०
ॐ गर्वहराय नमः ।
ॐ गरलिभूषणाय नमः ।
ॐ गविष्ठाय नमः ।
ॐ गर्जितारावाय नमः ।
ॐ गभीरहृदयाय नमः ।
ॐ गदिने नमः ।
ॐ गलत्कुष्ठहराय नमः ।
ॐ गर्भप्रदाय नमः ।
ॐ गर्भार्भरक्षकाय नमः ।
ॐ गर्भाधाराय नमः । ५०
ॐ गर्भवासिशिशुज्ञानप्रदाय नमः ।
ॐ गरुत्मत्तुल्यजवनाय नमः ।
ॐ गरुडध्वजवन्दिताय नमः ।
ॐ गयेडिताय नमः ।
ॐ गयाश्राद्धफलदाय नमः ।
ॐ गयाकृतये नमः ।
ॐ गदाधरावतारिणे नमः ।

ॐ गन्धर्वनगरार्चिताय नमः ।
ॐ गन्धर्वगानसन्तुष्टाय नमः ।
ॐ गरुडाग्रजवन्दिताय नमः । ६०
ॐ गणरात्रसमाराध्याय नमः ।
ॐ गर्हणास्तुतिसाम्यधिये नमः ।
ॐ गर्ताभनाभये नमः ।
ॐ गव्यूतिदीर्घतुण्डाय नमः ।
ॐ गभस्तिमते नमः ।
ॐ गर्हिताचारदूराय नमः ।
ॐ गरुडोपलभूषिताय नमः ।
ॐ गजारिविक्रमाय नमः ।
ॐ गन्धमूषवाजिने नमः ।
ॐ गतश्रमाय नमः । ७०
ॐ गवेषणीयाय नमः ।
ॐ गहनाय नमः ।
ॐ गहनस्थमुनिस्तुताय नमः ।
ॐ गवयच्छिदे नमः ।
ॐ गण्डकभिदे नमः ।
ॐ गह्वरापथवारणाय नमः ।
ॐ गजदन्तायुधाय नमः ।
ॐ गर्जद्रिपुघ्नाय नमः ।
ॐ गजकर्णिकाय नमः ।
ॐ गजचर्मामयच्छेत्रे नमः । ८०
ॐ गणाध्यक्षाय नमः ।
ॐ गणार्चिताय नमः ।
ॐ गणिकानर्तनप्रीताय नमः ।
ॐ गच्छते नमः ।
ॐ गन्धफलीप्रियाय नमः ।
ॐ गन्धकादिरसाधीशाय नमः ।
ॐ गणकानन्ददायकाय नमः ।
ॐ गरभादिजनुर्हर्त्रे नमः ।
ॐ गण्डकीगाहनोत्सुकाय नमः ।

ॐ गण्डूषीकृतवाराशये नमः । ९०
ॐ गरिमालघिमादिदाय नमः ।
ॐ गवाक्षवत्सौधवासिने नमः ।
ॐ गर्भिताय नमः ।
ॐ गर्भिणीनुताय नमः ।
ॐ गन्धमादनशैलाभाय नमः ।
ॐ गण्डभेरुण्डविक्रमाय नमः ।
ॐ गदिताय नमः ।
ॐ गद्गदारावसंस्तुताय नमः ।
ॐ गह्वरीपतये नमः ।
ॐ गजेशाय नमः । १००
ॐ गरीयसे नमः ।
ॐ गद्येड्याय नमः ।
ॐ गतभिदे नमः ।
ॐ गदितागमाय नमः ।
ॐ गर्हणीयगुणाभावाय नमः ।
ॐ गङ्गादिकशुचिप्रदाय नमः ।
ॐ गणनातीतविद्याश्रीबलायुष्यादिदायकाय नमः । १०८

॥ इति श्रीगणपतिगकाराष्टोत्तरशतनामावली समाप्ता ॥

*Ganapati Gakara Ashtottarashatanamavali*

pdf was typeset on August 31, 2019

Please send corrections to *sanskrit@cheerful.com*